International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 147-150
© 2020 IJSR
www.anantaajournal.com
Received: 07-01-2020
Accepted: 10-02-2020

**विद्वान् डा. आर्. सुब्रह्मण्य भिडे**
व्याख्याता,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः, आंध्र प्रदेश, भारत|

**Corresponding Author:**
**विद्वान् डा. आर्. सुब्रह्मण्य भिडे**
व्याख्याता,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः, आंध्र प्रदेश, भारत|

# आधुनिकसमाजे यागानां प्रासङ्गिकता

**विद्वान् डा. आर्. सुब्रह्मण्य भिडे**

## प्रस्तावना

समाजो नाम मनुष्याणां समूहः, सङ्घ इति यावत्। अमरकारो ब्रूते यत् -'पशूनां समजोऽन्येषां समाजोऽथ सधर्मिणाम्' (अ.को.2.6.42) इति। पशुसमूहः समजः। तदितराणां मनुष्याणां सङ्घः समाज इति।

युगान्तरे अर्वाचीनकाले च यो मनुष्यसमूहः समाजरूपेण आसीत् स एव मनुष्यसमाजः किञ्चिद्रूपान्तरेण इदानीमप्यस्ति। पूर्वेषु कालेष्वपि तदा तदा ज्ञान-विज्ञान-यान्त्रिक-तान्त्रिक-वैज्ञानिक-पर्वकालः आसीत्, इदानीमप्यस्ति, कालान्तरे अनुवर्तिष्यते, पुनश्च कालान्तरे तिरोहितं भवेदपि।

यथा पूर्वयुगेषु दशरथादीनां सशरीरं लोकान्तरगमनं, विना भूमिं रथगमनम्, विमानयानम्, समुद्रे सेतुनिर्माणम्, समुद्रमध्ये पट्टणनिर्माणम्, प्रनालशिशु (Test Tube Baby) निर्माणम्, असन्निहितस्थलात् वीक्षणं, श्रवणम्, इत्यादयः आसन्नेवेति पुराणेतिहास-रामायण-भारतादि-प्राचीनग्रन्थेभ्यः ज्ञायते।

अर्वाचीनकालेऽपि समुद्रशोधशीलाः केचन वैज्ञानिकाः शोधं कृत्वा वदन्ति यत् - अण्टार्क्टिकासमुद्रे एकं पुरातननगरं अन्तर्लीनमस्ति, तन्नगरञ्च अधुनातननगरापेक्षया आधुनिक-वैज्ञानिक-यान्त्रिक-तान्त्रिकोपकरणैः परिवृतं परिपूर्णमस्तीति। तञ्च विषयं नेतीति निराकर्तुं वयं न प्रभवाम। यतः अस्माकं इतिहाससाहित्येऽपि कृष्णस्य वैभवोपेतं द्वारकानगरं समुद्रे अन्तर्हितमिति स्मर्यते। पञ्चाशद्वर्षेभ्यः पूर्वं रामेश्वरक्षेत्रात् किञ्चिद्दूरं स्थिताः धनुष्कोटीत्यादयः केचन ग्रामा अपि समुद्रे अन्तर्हिताः। मुम्बयि, कलकत्ता, इत्यादयः समुद्रतीरस्थमहानगराः कालान्तरे प्राकृतिकविपरिणामेन दुरदृष्टवशात् नष्टाश्चेत्, भाविनि काले भविष्यच्छोधकाः शोधं कृत्वा तत्कालापेक्षया समुद्रान्तर्हितनगराणि वैज्ञानिक-यान्त्रिक-तान्त्रिकक्षेत्रे बहुदूरं गतानीति यदि ब्रूयुः, तदा कथं वा विश्वसितुं न शक्येत। किन्तु भ्रान्ता वयं अनाद्यनन्तकालप्रवाहगते विश्वेऽस्मिन् क्षणिकरूपेणागत्य,

'पूर्वं नाऽसीत्' 'भविष्यति (काले) न भविष्यति' 'इदानीमस्ती'त्येवं विश्ववैचित्र्यं निराकुर्मः।

एवञ्चायमाशयः - 'प्राचीनसमाजः' 'आधुनिकस्माजः' इति आग्रहदृष्ट्या विभागो मा भूदिति। यतः आ आदेः तदेव सूर्याचन्द्रमोयुक्तं जगत्। स एव संवत्सरः, त एवर्तवः, स एव मासः, अन्ततः घर्म-वृष्टि-शीतसहितः स एव कालः। एवं वेदविहिता यागाश्च प्राचीनार्वाचीन-वर्तमान-भविष्यत्कालेषु समाना भवन्ति। किन्तु कलियुगधर्मानुसारं अव्यवस्थितवर्णाश्रम-धर्मव्यवस्थायाः, अराजन्यराज्यव्यवस्थायाः, (केषुचन यागेषु) अधिकारिणामभावाच्च, 'कलियुगे राजसूयाश्वमेधादयः केचन यागाः आचरितुं न शक्यन्त' इति हेतुना 'तदितरेषां अलौकिकानां इष्टप्राप्यनिष्टपरिहारोपायप्रकाशकानां नित्य-नैमित्तिक-काम्यरूपाणाम् अग्निहोत्र-दर्शपूर्णमास-चातुर्मास्य-पशुबन्ध-सोमयागानां काम्येष्टीनां नैकासाञ्च प्रासङ्गिकता आधुनिकसमाजे नास्ती'ति वक्तुं न प्रभवाम, प्रत्युत सर्वकालेषु यागानां प्रासङ्गिकता अस्तीति भणितुमर्हाम।

किन्तु 'आधुनिकसमाज' इति पदम् एकत्र वेदोक्तनित्यकर्मसु अश्रद्दधानाः, भोगासक्ताः, इन्द्रियभोगेषु रताः, तदर्थं प्रयतमानाः, वेद-शास्त्रोक्तानि कर्माणि त्यजन्तः, दर्श-पूर्णमासादियागेषु निरासक्ता भूयांसो जना वर्तन्त इत्यर्थे चरितार्थं भवतीति; अपरत्र केचन सधनाः अधनाः सश्रद्धा गृहस्थाः लौकिककार्येषु कृतकृत्यतां सार्थकतां वा अलभमानाः वेद-शास्त्रोक्तकर्मज्ञानाभावात् योग्यमार्गदर्शनाभावाच्च किङ्कर्तव्यतामूढाः तूष्णीम्भावं भजन्त इत्येतदपि आधुनिकसमाजे दृश्यते।

'आधुनिककाले' 'पुरातनकाले' इत्येवं सर्वकालेषु मनुष्याणां कामाः यथा अप्रासङ्गिका न भवन्ति, तथा यागा अपि आधुनिकेत्यादिसर्वकालेषु अप्रासङ्गिका न भवन्ति। यतः कामानामाश्रय एव यागा अनुष्ठीयन्ते। यथा - 'वायव्यं श्वेतमालभेत भूतिकामः' (तै.सं.2.1.1) 'बार्हस्पत्यं शितिपृष्ठमालभेत ग्रामकामः' 'वैश्वदेवं बहुरूपमालभेतान्नकामः' (तै.सं.2.1.6) 'मैत्रावरुणीं द्विरूपामालभेत वृष्टिकामः' (तै.सं.2.1.7) 'आदित्यं चरुं निर्वपेत् सङ्ग्राममुपप्रयास्यन्' (तै.सं.2.2.6) 'अर्यम्णे चरुं निर्वपेत् सुवर्गकामः' (तै.सं.2.3.4) इत्येवं शतशः श्रुत्युक्तयागाः कामानवाप्तुमेव विहिताः सन्ति।

क्वचित्तु निष्कामानां गृहस्थानां भगवदाराधनारूपेण क्रियमाणानि अग्निहोत्रादीनि सोमयागान्तानि नित्यकर्माणि चित्तशुद्ध्यर्थं परम्परया मोक्षार्थञ्च कारणानि भवन्ति।

तथा च केचन यागाः केषाञ्चन कामानां पूर्तये विहितास्सन्तः, इतरेषामनुक्तानां कामानां पूरणायाऽपि शक्ता भवन्तीत्ययमंशोऽपि वेदेषु दृश्यत एव। यथा - त्रैधातवीयेष्टिर्नाम काचिदिष्टिः। तत्रत्यविधिवाक्यैः 'त्रैधातवीयेन यजेताभिचरन्' (तै.सं.2.4.11) इति, 'एतयैव यजेताभिचर्यमाणः' (तै.सं.2.4.11) इति, 'एतयैव यजेत सहस्रेण यक्ष्यमाणः' (तै.से.2.4.11) इति, 'एतयैव यजेत सहस्रेणेजानः' (तै.सं.2.4.11) इति, अभिचरतः, अभिचारपरिहारार्थिनः, सहस्रदक्षिणाकेन यागेन यक्ष्यमाणस्य, बहुविधयज्ञधनद्रव्यार्थिनः, सङ्कल्पभ्रंशदोषपरिहारार्थिनः विहिताः। परन्तु इयमेवेष्टिः 'सर्वो वा एष यज्ञो यत् त्रैधानवीयं कामायकामाय प्रयुज्यते' (तै.सं.2.4.11) इति सर्वकामार्थिनोऽपि विहितो वर्तते।

एवमेव राजसूयान्तर्गतस्य देविकाख्यहविर्यागस्य काम्यप्रयोगाः उच्यन्ते एभिर्विधिवाक्यैः। यथा - 'देविका निर्वपेत्प्रजाकामः' 'एता एव निर्वपेत् पशुकामः' 'एता एव निर्वपेद्ग्रामकामः' 'एता एव निर्वपेज्ज्योगामयावी' 'एता एव निर्वपेद्यं यज्ञो नोपनमेत्' 'एता एव निर्वपेदीजानः' 'एता एव निर्वपेयं मेधा नोपनमेत्' 'एता एव निर्वपेद्रुक्कामः' (तै.सं.3.4.9) इति प्रजाकामस्य, पशुकामस्य, ग्रामकामस्य, ज्योगामयाविनः, यज्ञकामस्य, ईजानस्य मेधाकामस्य, कान्तिकामस्य विधाय, अन्ते 'अथो यस्मै कामाय निरुप्यन्ते तमेवाभिरुपाप्नोति' (तै.सं.3.4.9) इति सर्वस्मै कामाय अयं देविकाख्यहविर्यागः प्रयोक्तुं शक्यत इति ज्ञायते।

एवञ्च वसोर्धाराविषयकब्राह्मणे 'यत्काम एनां जुहोति तदेवावरुन्धे' (तै.सं.5.7.3) इति, 'अथो कामा वै वसोर्धारा कामानेवावरुन्धे' (तै.सं.5.7.3) इति च ब्राह्मणवाक्यद्वयमत्र अनुसन्धातव्यं भवति। एवञ्च

वसोर्धारया अनुक्तान् बहून् कामान् लभते इति गम्यते। एवं कामावाप्तये अलौकिकोपायभूता यागाः अस्माकं सर्वदा सहकुर्वन्ति।

एवञ्च सृष्ट्यादौ विश्वसृट् प्रजा इमाः सृष्ट्वा तासां प्रजानां कामपूरणार्थं यागान् यज्ञान् वा वेदाक्षरेष्वाविश्चकार। अंशमिमं ब्रूते गीतासु भगवान् -

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।।
देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ।। (गी. 3.10-11) इति।
अंशोऽयं वेदेऽपि एवं श्रूयते –

'तस्मादितःप्रदानं देवा उपजीवन्ति' 'तस्मादमुतःप्रदानं मनुष्या उपजीवन्ति' (तै.सं.3.2.9) इति। इमं विश्वसृट्प्रकल्पितं प्रदानादानक्रमं यागादिकमननुष्ठाय उल्लङ्घ्य वा यः केवलं स्वयं भुङ्क्ते स स्तेनः पापी च भवतीति भगवता कथ्यते गीतायाम् –

'तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः' (गी. 3.12) इति।

'भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्' (गी. 3.13) इति च। इतश्च जगच्चक्र-प्रवृत्तिहेतवे यागादिकं कर्तव्यं भवति।

तदुच्यते गीतासु –

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्म समुद्भवः।।
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्।।
एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः।

अघायुरिन्द्रियारामो मोघं पार्थ स जीवति।। (गी. 3.14-16) इति।

इत्थं, परं श्रेयोऽवाप्तुं स्तेनत्वदोषनिवृत्यर्थं जगच्चक्रप्रवृत्तिहेत्वर्थञ्च प्राचीनाधुनिककालभेदं विना सर्वकालेषु यागानां प्रासङ्गिकता अस्त्येव।

'विश्वस्थितये यागा अवश्यमनुष्ठेया' इत्ययं विषयः काव्येष्वपि प्रसिद्ध एव। कालिदासः दिलीपमुद्दिश्य ब्रवीति। यथा –

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्।। (रघु.1.31) इति।

एवम् (अत्यन्त) प्राचीनकालादपि प्रवर्तितानां यागानां केनचिद्वा हेतुना परित्यागात् किमपि प्रयोजनं लाभो वा न दृश्यते; प्रत्युत अनर्थमेव जायते।

एवञ्च लोकेऽस्मिन् सर्वाः क्रियाः यज्ञरूपेणैव प्रवर्तन्ते। 'यागः' 'यज्ञः' इति अनर्थान्तरम्। आ सृष्टेरपि कालात् वयं यत्र यत्र 'जायत' इति वदामः, आहोस्वित् 'जात'मिति मन्यामहे, तत्र सर्वत्र यज्ञरूपेणैव क्रिया भवति। 'यागः' 'यज्ञः' इत्युक्त्या न केवलं अग्नौ हविःप्रक्षेपकर्म, किन्तु एकस्मात् कर्मणः अपरं यत्किमपि जायते चेत्, अथवा वस्त्वन्तरं गोचरश्चेत् तत्र 'यज्ञः प्रवृत्त' इति जानीयात्। अस्मिन् विषये उपलक्षणार्थमिदमुच्यते - 'वयं भुञ्ज्मः'। तेन भोजनपरिणामेन बलं भवति, रसरक्तादिपरम्परया रेतो जायते। एतदपि यज्ञरूपेण प्रचलति। अत एव भोजनाख्यं कर्म यज्ञरूपमिति मत्वैव तत्र नियमाः उपदिष्टाः - 'दिने कालद्वये भोक्तव्यम्' 'प्राणाहुतिपूर्वकं मौनेन सुखेन उपविश्य भोक्तव्य'मित्यादयः। एवं सर्वाः क्रियाः यज्ञरूपा इत्यत्र उलक्षणरूपेण कानिचन भगवद्वचनानि स्मर्यन्ते -

**1.** दैवमेवापरे यज्ञं योगिनः पर्युपासते।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति।।
**2.** श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।
शब्दादीन् विषयानन्य इन्द्रियाग्निषु जुह्वति।।
**3.** सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते।।
4. द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।
स्वाध्याययज्ञानयज्ञाश्च यतयः संशितव्रताः।।
**5.** अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे।
प्राणापानगती रुद्ध्वा प्राणायमपरायणाः।।

6. अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति। (गी. 4.25-30) इति ।

एवं नानाविधान् यज्ञानुक्त्वा अग्रे भगवान् कथयति यत् –
एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे। (गी. 4.32) इति।
एवञ्च अयज्ञस्य असौ लोक एव न भवति, किमुत परलोक इति निन्दापि स्मर्यते –
नाऽयं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम। (गी. 4.31) इति।
एवमेव वृष्ट्यादिविषयेषु 'यागः' 'यज्ञः' प्रकृतौ प्रचलतीति बहुत्र उल्लेखाः लभ्यन्त एव। तथा च, यज्ञं यागं वा विरहस्य मनुष्यसमाजः प्रकृतिर्वा नास्ति। वयं यागं न कुर्मश्चेदपि प्रकृतौ यागः प्रचलत्येव। अस्मिन् विषये उपलक्षणरूपेण पञ्चाग्निविद्याप्रकरणगतानि कानिचन छान्दोग्योपनिषद्वाक्यानि उदाह्रियन्ते -

1. असौ वाव लोको गौतमाग्निः ... तस्मिन्नेतस्मिन्नाग्नौ देवाः श्रद्धां जुह्वति। तस्या आहुतेः सोमो राजा सम्भवति।
2. पर्जन्यो वाव गौतमाग्निः ... तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति। तस्या आहुतेर्वर्षं सम्भवति।
3. पृथिवी वाव गौतमाग्निः ... तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति। तस्या आहुतेरन्नं सम्भवति।
4. पुरुषो वाव गौतमाग्निः ... तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति। तस्या आहुते रेतः सम्भवति।
5. योषा वाव गौतमाग्निः ... तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति। तस्या आहुतेर्गर्भः सम्भवति। (छां.5.4.1-5.8.2) इति।

एवं द्युलोकाग्नौ श्रद्धायागेन सोमो राजा, पर्जन्याग्नौ सोमराड्यागेन वर्षम्, पृथिव्यग्नौ वर्षयागेन अन्नम्, पुरुषाग्नौ अन्नयागेन रेतः, योषाग्नौ रेतोहोमेन गर्भश्च सम्भवन्ति।
एवञ्च पूर्वोपस्थापितसर्वांशानुसारं मनुष्याणां कामानाञ्च मिथः प्राचीनाधुनिकभेदं विना सार्वकालिकसम्बद्धत्वात् तत्कामपूरणार्थं, जगच्चक्रप्रवर्तनहेत्वर्थं, विश्वस्थितिसन्धारणार्थं, स्तेनत्वदोषनिवृत्त्यर्थं, मोघजीविकानिन्दादोषपरिहारार्थं सार्थकजीविकां प्रवर्तयितुञ्च अनितरसाधारणोपायलक्षणभूतानां यागानां प्रासङ्गिकता आधुनिकसमाजेऽपि निश्चप्रचमस्तीति शम्।